दशमः पाठः

# १० स्वाध्यायान्मा प्रमदः




*(छात्राः विद्यालयाद् बहिः भित्तौ लग्नं विशालं पत्रं पश्यन्ति)*

**वेदप्रकाशः** – राजेश ! किमर्थमत्र भित्तिपत्रं संलग्नम् ?

**राजेशः** – विश्वविद्यालये समावर्तनोत्सवः भविष्यति, तदर्थम् एतत् विशालं रमणीयं भित्तिपत्रम्।

**कात्यायनी** – समावर्तनोत्सवे किं भविष्यति ?

**सुजाता** – अरे, न जानासि ? सभा भविष्यति, प्रमाणपत्रवितरणं च भविष्यति।

**राजेशः** – कश्चिद् विशिष्टः विद्वान् पदाधिकारी वा आगत्य दीक्षान्तभाषणं करिष्यति।

**कात्यायनी** – दीक्षान्तः नाम किम् ?

**वेदप्रकाशः** – अहमपि न जानामि, अस्मिन् विषये अध्यापकमेव प्रक्ष्यामः।

*(अध्यापकः पृष्ठतः छात्राणां वार्तालापं श्रुत्वा)*


**अध्यापकः** – अयि छात्राः ! चिन्ता मास्तु, सर्वं बोधयिष्यामि। प्राचीनकालीना शिक्षाव्यवस्था अतीव स्पृहणीया आसीत्। बालाः गुरुकुलेषु स्थित्वा गुरुभ्यः विद्याध्ययनं कुर्वन्ति स्म।

**वेदप्रकाशः** – महोदय ! तत्र छात्राः किं किं पठन्ति स्म ?

**अध्यापकः** – तत्र विशेषतः धर्म-दर्शन-विज्ञान-वेदवेदाङ्गानाम् अध्ययनम् अध्यापनं च भवतः स्म। विद्यार्थिनः प्रायेण तत्र द्वादशवर्षाणि यावत् पठन्ति स्म। अध्ययनसमाप्तौ गुरुकुलात् स्वगृहं गच्छन्ति स्म। शिक्षान्ते समावर्तनोत्सवः भवतः स्म। आचार्यः समावर्तनकाले अन्तेवासिभ्यः उपदिशति स्म। तादृशः उपदेशमूलकः सारस्वतकार्यक्रमः अधुनापि आचर्यते। स एव दीक्षान्तः।

**छात्राः** – आचार्य ! तदानीं दीक्षान्ते किं किम् उपदिशति स्म ?

**अध्यापकः** – अस्तु, अवहिताः शृणुत—



© NCERT not to be republished

*कृष्णयजुर्वेदान्तर्गता* काचिद् उपनिषद् वर्तते, *तैत्तिरीयोपनिषद्* इति। तत्र शिक्षावल्ली आनन्दवल्ली भृगुवल्लीति भागत्रयमस्ति। विशेषतः नैतिक-शैक्षिकोपदेशनिमित्तं शिक्षावल्ली प्रसिद्धा। तत्र शिष्यः स्वाधीतविद्यायाः जीवने सदुपयोगं कथं कुर्याद् इति सुष्ठु प्रकाशितम्। तदेव अनुसरणीयम् अस्माभिः। शृण्वन्तु ततः कानिचन उपदेशवाक्यानि।

**"वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।"**

© NCERT not to be republished

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अनूच्य (अनु+√वच्+ ल्यप्) | उक्त्वा | पढ़ाकर | having taught | |
| अनुशास्ति (अनु+√शास् +लट्-प्र. पु.ए.व.) | उपदिशति | उपदेश देता है | to instruct | |
| अन्तेवासिनम् (अन्ते+ √वस्+ णिनि पुं.द्वि.ए.व.) | शिष्यम् | शिष्य को | to the disciple (student) | |

| | | | | |
|---|---|---|---|---|
| वद (√वद्+ लोट् म.पु.ए.व.) | कथय | बोलो | speak | |
| चर (√चर्+लोटि म.पु.ए.व.) | आचरणं कुरु | आचरण करो | practice / conduct your self | |
| स्वाध्यायात् (पुं.प.ए.व.) | वेदस्य निर्दिष्टांशस्य अध्ययनात् | वेद के निर्दिष्ट भाग को पढ़ने से | by studing the prescribed section of the veda | |
| मा प्रमदः (प्र+√मद् + लुङ् + म.पु. ए.व.) | न विस्मरः | नहीं भूलना | to not forget | |
| न प्रमदितव्यम् (प्र+√मद्+तव्यत् नपुं. प्र.ए.व.) | प्रमादः न कर्तव्यः | नहीं भूलना चाहिए | should not be forgotten | |
| कुशलात् (नपुं.प्र.ए.व.) | आत्मरक्षामूलक-कार्यात् | आत्मरक्षा के लिए किए जाने वाले कर्म से | from actions performed for self protection | |
| भूत्यै (स्त्री.च.ए.व.) | ऐश्वर्यनिमित्तम् | ऐश्वर्य देने वाले शुभकार्यों के लिए | for auspicious deeds that bring prosperity | |
| प्रवचनम् (न.पुं.प्र.ए.व.) | प्रकृष्टं वचनम् | चर्चा | discussion | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| मातृदेवः (बहुव्रीहिः) | माता देवः यस्य सः | माता देवता है जिसके लिए | one who treats his mother as a deity | |
| पितृदेवः (बहुव्रीहिः) | पिता देवः यस्य सः | पिता को देवता समझने वाला | one who treats his father as a deity | |
| अतिथिदेवः (बहुव्रीहिः) | अतिथिः देवः यस्य सः | अतिथि को देवता समझने वाला | one who treats a guest as a deity | |
| आचार्यदेवः (बहुव्रीहिः) | आचार्यः देवः यस्य सः | आचार्य को देवता समझने वाला | one who treats his teacher as a deity | |
| अनवद्यानि (नञ् तत्पुरुषः) | न अवद्यानि | निन्दा रहित | without blame | |
| सेवितव्यानि (√सेव् +तव्यत् न.पु. प्र.ब.व) | पालनीयानि | आचरण करना चाहिए | should perform | |
| नो (अव्ययम्) | निषेधः | नहीं | not / no | |
| इतराणि (नपुं.प्र.बहु) | अन्यानि | इनसे विपरीत | opposite to these | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| सुचरितानि (कर्मधारय नपुं.पु.ब.व) | सुष्ठु शोभनानि चरितानि | शास्त्र के अनुकूल शुभ कर्म | auspicious deeds in accordance to the scriptures | |
| उपास्यानि (उप+√आस्+यत् नपुं. प्र.पु.ब.व) | उपासनायोग्यानि | उपासना करनी चाहिए | should worship | |
| श्रेयांसः (पुं प्र.ब.व) | श्रेष्ठाः | श्रेष्ठ | superior | |
| ब्राह्मणाः (पुं प्र.ब.व) | ब्रह्मविदः विद्वांसः | ब्रह्म को जानने वाले विद्वान | scholars who know brahman | |
| आसनेन (नपुं.तृ. एक). | आसनप्रदानेन | बैठने के लिए आसन देकर | by offering a seat to sit | |
| प्रश्वसितव्यम् (प्र+√श्वस्+तव्यत् नपुं. प्र.ए.व.) | सेवनीयम् | थकान दूर करनी चाहिए | should remove tiredness | |
| श्रद्धया (स्त्री.तृ.ए.व.) | सम्मानेन/आदरेण | आदर से | with respect | |
| देयम् (√दा+यत्) | दानयोग्यम् | देना चाहिए | should be given | |
| अश्रद्धया (स्त्री.तृ.ए.व. नञ् तत्पुरुषः) | न श्रद्धा, तया | अनादर भाव से | disrespectfully | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| अदेयम्<br>(नञ् तत्पुरुषः) | न देयम् | देना नहीं | to not give | |
| श्रिया<br>(स्त्री.तृ.ए.व.) | धनानुसारम् | धन के<br>अनुसार | according to<br>ones wealth | |
| भिया<br>(स्त्री.तृ.ए.व.) | भयेन | भय(डर)<br>मानते हुए | with fear | |
| ह्रिया<br>(स्त्री.तृ.ए.व.) | लज्जया | लज्जापूर्वक | modestly | |
| संविदा<br>(स्त्री.तृ.ए.व.) | ज्ञानेन | मैत्री भाव से | with a feeling<br>of friendship | |
| आदेशः<br>(आ+√दिश्+घञ्) | आज्ञा | आज्ञा | to give order | |
| उपदेशः<br>(उप्+√दिश्+ घञ्) | परामर्शः | उपदेश | advice | |
| वेदोपनिषत्<br>(षष्ठीतत्पुरुषः) | वेदस्य उपनिषत् | वेदों का<br>रहस्य | the secret of<br>the vedas | |
| उपनिषत्<br>(उप+नि+√सद्+क्विप्) | गूढः उपदेशः | अध्यात्म<br>विद्या | spiritual<br>knowledge | |
| अनुशासनम्<br>(अनु+√शास्+ल्युट्<br>स्त्री.प्र.ए.व.) | आज्ञापालनम् | नियमानुकूल<br>आचरण | disciplined<br>conduct | |
| उपासितव्यम्<br>(उप्+√आस्+तव्यत्<br>नपुं. प्र.ए.व.) | उपासनायोग्यम् | उपासना<br>करनी चाहिए | should<br>worship | |

© NCERT not to be republished

# अभ्यासाद् जायते सिद्धिः

१. **अधोलिखितप्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —**

(क) आचार्यः कम् अनुशास्ति ?

(ख) किं कृत्वा आचार्यः अन्तेवासिनम् अनुशास्ति ?

(ग) कानि सेवितव्यानि ?

(घ) के अस्मत् श्रेयांसः भवन्ति ?

(ङ) कथम् अदेयम् ?

२. **समस्तपदानि पठितविषयात् निरूपयत —**

(क) माता एव देवः यस्य सः ...............................

(ख) पिता एव देवः यस्य सः ...............................

(ग) न अवद्यानि ...............................

(घ) न श्रद्धा, तया ...............................

(ङ) सुष्ठु (शोभनानि) चरितानि ...............................

३. **स्तम्भमेलनं कुरुत —**

| **क स्तम्भः** | **ख स्तम्भः** |
|---|---|
| (क) सुचरितानि | (१) देयम् |
| (ख) संविदा | (२) वेदोपनिषत् |
| (ग) एषा | (३) उपास्यानि |
| (घ) अनवद्यानि कर्माणि | (४) प्रश्वसितव्यम् |
| (ङ) आसनेन | (५) सेवितव्यानि |

© NCERT not to be republished

४. रेखाङ्कितपदानाम् आधारेण प्रश्ननिर्माणं कुरत —

(क) तानि सेवितव्यानि ………………

(ख) अश्रद्धयाऽदेयम् ………………………

(ग) धर्मात् न प्रमदितव्यम् ………………………

(घ) एतत् अनुशासनम् ………………………..

(ङ) एष उपदेशः ……………………

५. अधस्तनानि पदानि व्यवहृत्य वाक्यानि रचयत —

(क) इतराणि ……………………….

(ख) प्रमदितव्यम् ……………………….

(ग) भिया ……………………….

(घ) सुचरितानि ……………………….

(ङ) त्वया ……………………….

६. विषयानुसारं शुद्धम् उत्तरं चिनुत —

(क) कम् अनूच्य आचार्यः अन्तेवासिनमनुशास्ति ?

(i) शास्त्रम् (ii) उपनिषदम् (iii) वेदम् (iv) मन्त्रम्

(ख) कस्मात् न प्रमदितव्यम् ?

(i) असत्यात् (ii) अधर्मात् (iii) स्वाध्यायात् (iv) आलस्यात्

(ग) मातृदेवः इत्यस्य कोऽर्थः ?

(i) मातृदेवी (ii) माता एव देवः यस्य सः
(iii) माता हि देवता (iv) मातृस्वरूपा देवः

(घ) कानि सेवितव्यानि ?

(i) अनवद्यानि कर्माणि (ii) सुचरितानि
(iii) उपास्यानि (iv) इतराणि

(ङ) ह्रिया - इत्यस्य कोऽर्थः ?

(i) भयेन (ii) लज्जया (iii) श्रद्धया (iv) मित्रभावेन

## स्वाध्यायान्मा प्रमदः

भारतीय-दर्शनस्य वैदिकसाहित्यस्य साररूपेण उपनिषद्वाङ्मयं प्रसिद्धम्, उपनिषद्वाङ्मयस्य समाजं विश्वं च प्रति महती उपादेयता विद्यते। व्यावहारिके जगति मानवजीवनस्य पूर्णताप्राप्तये आभिमुख्यं प्राधान्येन उपनिषद्वाङ्मये सन्निवेशितम्। *कृष्णयजुर्वेदान्तर्गता तैत्तिरीयोपनिषद्* विशेषतः शैक्षिकम् उपादानं प्रसारयति।

उप-सामीप्येन नि-नितरां निधाय अन्तर्धाय सीदन्ति प्राप्नुवन्ति परं ब्रह्म यया विद्यया सा उपनिषत्।

**उपनिषत्समूहस्तु वेदान्तसार उच्यते।**
**गुरूपदेशमात्रेण शिष्यसंशयनाशकः॥**

**अध्यात्मब्रह्मविद्यायाः शङ्कानाशनकारणम्।**
**उपनिषद्रहस्यं तु सर्वे जानन्तु तत्त्वतः॥**

### भावार्थः

आचारनिपुणः गुरुः वेदं पाठयित्वा वेदस्य रहस्यं साररूपेण शिष्यं प्रति उपदिशति-यथार्थम् अवगतं सत्यं तथ्यं वक्तव्यम्। शास्त्रपरम्परानुसारं धर्मसम्मतं कर्म आचरणीयम्, प्रतिदिनं वेदशास्त्राणाम् अध्ययनात् विच्युतिः न भवेत्। सत्यनिष्ठायाः अवहेला न कार्या, धार्मिकाध्यात्मिकानुष्ठानात् विरतिः न भवेत्। आत्मरक्षामूलककार्यात् विच्युतिः न भवेत्। ऐश्वर्यलाभार्थकमङ्गलकार्येषु प्रमाद न भवेत्। जनः आत्मनः उन्नतये शुभकार्येषु मनोनिवेशं कुर्यात्। स्वयं वेदशास्त्राणाम् अध्ययनं कुर्यात् अन्यान् अपि वेदशास्त्रार्थान् बोधयेत्। लोकहितकरयज्ञ-परोपकार-वृक्षरोपणप्रभृतिदैविककार्यसमुदायात् पूर्वजानां पितृलोकानां च कृते श्राद्धतर्पणादिकार्यात् विच्युतः न भवेत्। (लोकानां कल्याणार्थं दैविकं कार्यं सम्पादयेत्, स्वजीवने पितृपुरुषाणां हितकरं वचनम् आदर्शं च पालयेत्।

माता, पिता, आचार्यः, आगन्तुकः सज्जनः च एव प्रत्यक्षं देवाः भवन्ति इति विचारयेत्। यानि अनिन्दितानि प्रशंसनीयानि कार्याणि सन्ति, तानि अवश्यं पालयेत्। अपराणि निन्दितानि कर्माणि वर्जयेत्, यानि अस्माकं गुरुजनानां शुभकार्याणि उत्तमानि आचरणानि सन्ति तानि अनुसरेत्, संशयजनकानि असदाचरणानि वर्जयेत्। ये केचन ब्रह्मदर्शिनः विद्वांसः सन्ति ते अवश्यम् अस्माकम् अपेक्षया श्रेष्ठाः भवन्ति, अतः तेषां दर्शनात् सान्निध्यलाभात् च आसनादिप्रदानपूर्वकं श्रम-क्लान्तिलाघवनिमित्तं यथाविधि सेवां कुर्यात्। दानमेव महत् पुण्यम् अतः यस्मै किञ्चित् दातव्यमस्ति श्रद्धया दद्यात्, कदापि अनादरभावेन न दातव्यम्। स्वशक्त्या धर्मार्जितधनानुसारं लज्जया विनयभावेन च दातव्यम्। उत्तमविचारेण मित्रभावेन धनं दद्यात्।

एषः अवश्यं पालनीयः विधिः। शिष्य सन्तति कृते एष आजीवनं हितकरः उपदेशसमूहः। एतत् सर्वं वेदस्य रहस्यम्। एतत् अनुशासनम् ईश्वरस्य आज्ञा। एवं प्रकारेण सर्वविधम् अनुष्ठानं करणीयम्।

© NCERT not to be republished

- वेदम्+अनूच्य+आचार्यः+अन्तेवासिनम्+अनुशास्ति=वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति
- स्वाध्यायात् + मा = स्वाध्यायान्मा, सत्यात् + न = सत्यान्न
- कुशलात् + न = कुशलान्न, यानि + अस्माकम् = यान्यस्माकम्
- त्वया + उपास्यानि = त्वयोपास्यनि, च + अस्मत् + श्रेयांसः + ब्राह्मणाः = चास्मच्छ्रेयांसो ब्राह्मणाः
- त्वया + आसनेन = त्वयाऽसनेन,
- एतत् + अनुशासनम् = एतदनुशासनम्

**प्रसिद्धाः उपनिषदः**

**ईशकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः।**
**ऐतरेयं छान्दोग्यञ्च बृहदारण्यकं दश॥**



## यस्तु क्रियावान् मनुजः स विद्वान्

(१) उपनिषदां नामानि लिखत। प्रसिद्धानाम् उपनिषदां संग्रहं कृत्वा पठत।

(२) कस्याश्चित् उपनिषदः श्रेष्ठं ध्येयं वाक्यं लिखित्वा गृहे स्थापयत।

(३) विविधानां प्रतिष्ठानानाम् औपनिषदिकसूक्तानि संगृह्य लिखत।

(४) एकस्याः उपनिषदः महत्त्वविषये एकम् अनुच्छेदं लिखत।

© NCERT not to be republished